শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ৱাদিরাজযতি কৃতং

॥ শ্রী লক্ষ্মী আর্যাৱৃত্তম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী লক্ষ্মী আর্যাৱৃত্তম্ ॥

আর্যাৱৃত্তং ৱিচিত্রনার্যাস্সা জগতি সৌভগৎৱকরী।
ৱার্যাকাশাদ্যখিলা ভূর্যাৱদ্ধার্যতে ৎৱযা দেৱ্যা॥ **1**॥

উন্মীলয মন্নযনে ৎৱং মন্যে লক্ষ্মি লোকমান্যাসি।
চিন্ময়সুভগাৱযৱে কর্মকরঃ স্যামহং চ তৱ কমিতুঃ॥ **2**॥

মন্মথজননি মনোজ্ঞেঽহং মমতারহিতযোগিকুলমহিতে।
দৃঙ্মলমুন্মূলয মে সম্যক্ শ্রীকৃষ্ণমূর্তিমীক্ষেঽহম্॥ **3**॥

কল্মষখণ্ডনশীলে রম্যকপোলে সরোজমুখি সুতনো।
অম্লানপদ্মহস্তে নির্মলমচ্চক্ষুরীক্ষতাং কৃষ্ণম্॥ **4**॥

পূর্ৱং ত্রিগুণময়ী যা সর্ৱং কার্যং করোতি যা পশ্চাৎ।
চার্ৱংবুজাক্ষদীক্ষাদক্ষং মেঽক্ষীহ সা রমা কুর্যাৎ॥ **5**॥

ৱশ্যং যস্যাঃ সকলং দৃশ্যং যস্যাঃ সমস্তমপি ৱিশ্ৱম্।
নশ্যৎসু যা ন নশ্যেৎ ক্লিশ্যৎসু চ যা কদাঽপি ন ক্লিশ্যেৎ॥ **6**॥

জ্ঞপ্তেঃ করণানি চ ষটপঞ্চকৃতের্হেতুভূতকরণানি।
বুধ্যেযুর্যৎকৃত্যং সিধ্যেদ্ৱৈ তৎকলং চ যৎকৃপযা॥ **7**॥

সা শ্রীরাশ্রিতরক্ষাদীক্ষা দুষ্কর্মশিক্ষণে চ পটুঃ।
অশ্ৱাস্যং হি দিদৃক্ষোঃ মেঽক্ষ্নোস্তদ্ৱীক্ষণোৎসৱং দদ্যাৎ॥ **8**॥

সঙ্গীতসাঙ্গৱেদা মঙ্গলদেৱী মনোজ্ঞসর্ৱাঙ্গী।
ভঙ্গাদিদোষরহিতা তং গুণরাশিং মমেক্ষযেৎস্ৱপতিম্॥ **9**॥

শক্তিঃ সংৱিৎস্ফূর্তির্মূর্তীঃ প্রৱৃত্তিশ্চ যদ্বশে নিত্যম্।
শক্তা ৎৱমের সুজনোদ্ধর্তী তং চেৎপ্রদর্শযস্ব পতিম্॥ **10**॥

কুণ্ডলরত্নতিলকলসন্নাসামণিকণ্ঠসূত্রহারধরা।
অঙ্গদকঙ্কণকাঞ্চীসৎকঞ্চুকপীতৱসনরশনাভা॥ **11**॥

সদ্রত্নখচিতকিঙ্কিণিমুদ্রাগ্রৈৱেযনূপুরাদিরুচা।
ভদ্রোদ্যদিন্দুৱদনা যযা মে মধ্ৱৱরদমীক্ষযতু॥ **12**॥

যা দেৱী নিজরমণস্যাঙ্কগতা পশ্যতি স্ম তং সততম্।
তস্যাঃ স্তুতিমিতি কৃতৱান্ কৃষ্ণদৃগর্থী স ৱাদিরাজযতিঃ॥ **13**॥

॥ শ্রী লক্ষ্মী আর্যাৱৃত্তং সমাপ্তম্॥